## अष्टमः पाठः

# भारतीया संस्कृतिः

## (भारत की संस्कृति)

मानव-जीवनस्य संस्करणं संस्कृतिः। अस्माकं पूर्वजाः मानवजीवन संस्कर्तुं महान्तं प्रयत्नम् अकुर्वन्। ते अस्माकं जीवनस्य संस्करणाय यान् आचारान् विचारान् च अदर्शयन् तत् सर्वम् अस्माकं संस्कृतिः।

'विश्वस्य स्रष्टा ईश्वरः एक एव' इति भारतीय-संस्कृतेः मूलम्। विभिन्नमतावलम्बिनः विविधैः नामभिः एकम् एव ईश्वरं भजन्ते। अग्निः, इन्द्रः, कृष्णः, करीमः, रामः, रहीमः, जिनः, बुद्धः, ख्रिस्तः, अल्लाहः इत्यादीनि नामानि एकस्य एव परमात्मनः सन्ति। तम् एव ईश्वरं जनाः गुरुः इत्यपि मन्यन्ते। अतः सर्वेषां मतानां समभावः सम्मानश्च अस्माकं संस्कृतेः सन्देशः।

भारतीया संस्कृतिः तु सर्वेषां मतावलम्बिनां संगमस्थली। काले काले विविधाः विचाराः भारतीय-संस्कृतौ समाहिताः। एषा संस्कृतिः सामासिकी संस्कृतिः यस्याः विकासे विविधानां जातीनां सम्प्रदायानां विश्वासानांच योगदानं दृश्यते। अतएव अस्माकं भारतीयानाम् एका संस्कृतिः एका च राष्ट्रीयता। सर्वेऽपि वयं एकस्याः संस्कृतेः समुपासकाः, एकस्य राष्ट्रस्य च राष्ट्रियाः। यथा भ्रातरः परस्परं मिलित्वा सहयोगेन सौहार्देन च परिवारस्य उन्नतिं कुर्वन्ति, तथैव अस्माभिः अपि सहयोगेन सौहार्देन च राष्ट्रस्य उन्नतिः कर्त्तव्या।

अस्माकं संस्कृतिः सदा गतिशीला वर्तते। मानवजीवनं संस्कर्तुम् एषा यथासमयं नवां नवां विचारधारां स्वीकरोति, नवां शक्तिं च प्राप्नोति। अत्र दुराग्रहः नास्ति, यत् युक्तियुक्तं कल्याणकारि च तदत्र सहर्षं गृहीतं भवति। एतस्याः गतिशीलतायाः रहस्यं मानव-जीवनस्य शाश्वतमूल्येषु निहितम्, तद् यथा सत्यस्य प्रतिष्ठा, सर्वभूतेषु समभावः विचारेषु औदार्यम्, आचारे दृढ़ता चेति।

एषा कर्मवीराणां संस्कृतिः। 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इति अस्याः उद्घोषः। पूर्वं कर्म, तदनन्तरं फलम् इति अस्माकं संस्कृते नियमः। इदानीं यदा वयं राष्ट्रस्य नवनिर्माणे संलग्नाः स्मः निरन्तरं कर्मकरणम् अस्माकं मुख्यं कर्त्तव्यम्। निजस्य श्रमस्य फलं भोग्यं, अन्यस्य श्रमस्य शोषणं सर्वथा वर्जनीयम्। यदि वयं विपरीतम् आचरामः तदा न वयं सत्यं भारतीय-संस्कृतेः उपासकाः। वयं तदैव यथार्थं भारतीयाः यदा अस्माकम् आचारे विचारे च अस्माकं संस्कृतिः लक्षिता भवेत्। अभिलाषामः वयं यत् विश्वस्य अभ्युदयाय भारतीय संस्कृतेः एषः दिव्यः सन्देशः लोके सर्वत्र प्रसरेत्।

**''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥''**

# ||अभ्यास प्रश्न||

## ➡ लघु उत्तरीय प्रश्न

**निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए–**

(1) 'संस्कृति' शब्दस्य किं तात्पर्यम् अस्ति? **(2020MG)**
(2) भारतीय संस्कृतेः मूलं किम् अस्ति? **(2016CD,17AA,20ME)**
(3) भारतीया संस्कृतिः कीदृशी वर्तते? **(2017AB,AE,19AE)**
(4) भारतीय संस्कृतेः कः नियमः?
(5) किम् फलम् भोग्यं किं च वर्जनीयम्?
(6) भारतीय संस्कृतेः कः दिव्यः सन्देशः अस्ति?
(7) भारतीय संस्कृतिः का संगमस्थली?
(8) भारतीय संस्कृतौ कः विशेषः गुणः?
(9) अस्माकम् मुख्य कर्त्तव्यं किम् अस्ति?
(10) 'सर्वे भवन्तु सुखिनः' एषः दिव्यः सन्देशः कस्य अस्ति?
(11) भारतीय संस्कृतिः कस्य अभ्युदयाय इति।
(12) अस्माकं संस्कृतेः कः नियमः? **(2016CE,17AG,18HF,19AC)**
(13) विश्वस्य स्रष्टा कः?

## ➡ अनुवादात्मक प्रश्न

**1. निम्नलिखित गद्यांशों का ससन्दर्भ हिन्दी में अनुवाद कीजिए—**

(क) विश्वस्य स्रष्टा..................संस्कृतेः सन्देशः।

**अथवा**

मानव-जीवनस्य.................. संस्कृतेः सन्देशः।

**अथवा**

मानव-जीवनस्य संस्करणं..........ईश्वरं भजन्ते।

(ख) एषा संस्कृतिः..............................कर्त्तव्या।

(ग) भारतीया संस्कृतिः.........................राष्ट्रियाः। **(2019AB,AF)**

**अथवा**

एषा संस्कृतिः...........राष्ट्रस्य उन्नतिः कर्त्तव्याः।

(घ) अस्माकं संस्कृतिः.............................. चेति। **(2017AD,19AD,AG)**

(ङ) एषा कर्मवीराणां......................लक्षिता भवेत्।

**अथवा**

एषा कर्मवीराणां.............. संस्कृतेः उपासकाः।

**अथवा**

निजस्य श्रमस्य फलं......संस्कृतिः लक्षिता भवेत्। **(2016CC)**

(च) सर्वे भवन्तु...................................भवेत्। (2016CA,18HA,20MA)

(छ) इदानीं यदा वयं.......................लक्षिता भवेत्।

(ज) पूर्वं कर्म.........................संस्कृतेः उपासकाः।

**अथवा**

पूर्वं कर्म.........................संस्कृतिः लक्षिता भवेत्।

**2. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) मानव-जीवन को संस्कारित करना ही संस्कृति है।

(ख) हमारे पूर्वज धन्य थे।

(ग) भारतीय संस्कृति सामासिकी एवं गतिशीला है।

(घ) हम सब एक ही संस्कृति के उपासक हैं।

(ङ) भारतीय संस्कृति सर्वश्रेष्ठ है।

(च) काम करके ही फल मिलता है।

(छ) सभी नीरोग रहें और कल्याण प्राप्त करें।

## ➠ व्याकरणात्मक प्रश्न

(1) निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए—
इत्यादि, मतावलम्बी, यथार्थम्, अभ्युदय।

(2) निम्नलिखित शब्दों के विभक्ति एवं वचन बताइये—
संस्कृतेः, अस्माभिः, कर्माणि, नवनिर्माणे।

## ➠ आन्तरिक मूल्यांकन

भारतीय संस्कृति की विशेषताओं को बिन्दुओं में दर्शाइए।

## शब्दार्थ

**यान्** = जिनको। **अदर्शयन्** = दिखलाये। **मूलम्** = जड़। **ख्रिस्तः** = ईसा। **शाश्वतम्** = सदा रहनेवाला। **दृश्यते** = दिखता है। **मिलित्वा** = मिलकर (क्त्वा प्रत्यय)। **वर्तते** = विद्यमान है। **उद्घोषः** = नारा। **अभ्युदयः** = उन्नति (अभि+ उदय—यण् सन्धि)। **निरामयाः** = रोगरहित। **दुराग्रहः** = अनुचित आग्रह। **भद्राणि** = कल्याण। **संस्करणम्** = संस्कार, सँवारना। **संस्कर्तुम्** = संवारने के लिए। **संस्करणाम** = संस्कार के लिए। **विभिन्नमतावलम्बिनः** = विविध मतों के अनुयायी। **सङ्गमस्थली** = मिलाने का स्थान। **समाहिताः** = आ मिले। **सामासिकी** = समुच्चयात्मक, समन्वयात्मक। **सौहार्देन** = प्रेम से। **शाश्वतमूल्येषु** = सदा रहने वाले आदर्शों में। **निहितम्** = रखा हुआ है। **जिजीविषेद** = जीने की इच्छा करे। **समाः** = वर्ष। **संलग्नाः** = लगे हुए हैं। **वर्जनीयम्** = छोड़ने योग्य। **अभिलाषामः** = (हम) चाहते हैं। **दुःखभाग्** = दुःख का भागी।

●●